नं. ५१६३

नाम: कात्यायन सूत्र व्याख्यानं
११शाध्याय:

कर्ता. श्री याज्ञिक देव:

पत्र सं. १० — सं. ×

विषय: सूत्र पद्धति परिशिष्टं

५१६३

© Dharmartha Trust J&K. Digitized by eGangotri

कात्यायनसूत्रव्याख्याने कादयूणध्यायः

५१७३

5173
10
५८

© Dharmartha Trust J&K. Digitized by eGangotri

२५०

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगणेशाय नमः ज्योतिष्टोमसंबंध्याध्वर्यवमुक्तं इदानीं ब्रह्मत्वं वक्तुं प्रतिजानीते
१ ब्रह्मत्वमतः अतः परं ब्रह्मत्वं ब्रह्मणः कर्मोच्यते ब्रह्मणः कर्म ब्रह्मत्वं ब्रह्मणस्त्व
इतित्वः पृथगुच्यमानमनाकुलं भवति अपि च यथाकालमुच्यमाने पुनः पुनर्वक्तव्यं
भवतीदं ब्रह्मण इदं ब्रह्मण इति पृथगुपदेशेने षदोष इति तत्र ब्रह्मत्वमित्येतदुच्य दु ४
ते माभूदाध्वर्यवमित्येवमर्थं अत इति च यदि नोच्यते प्रथममपदार्थ एव ब्रह्मणः स्यात्त
तः परमाध्वर्यवमेव स्यात् अत इत्येवमुक्ते सति अत ऊर्ध्वमध्याय परिसमाप्तेर्यावदुच्य
ते तावत्सर्वं ब्रह्मत्वमिति सिद्ध्यति वाग्यतः कर्मणि वर्तमाने सोमिके कर्मणि वर्तमाने क्रि
यमाणे ब्रह्मा वाग्यतः कृतवाग्यमो भवेत् वर्तमान इत्युक्त्वा यस्मिन्काले कर्म न क्रियते
तदा वाग्यतो न भवति यथोपसत्सु पौर्वाह्णिकापराह्णिकयो [illegible] सोमिके सामप्रकरणे
पठितस्य एव कर्मणि सोमक्रयहविर्द्धानसदः करणादौ अभिषवग्रहग्रहणस्तोत्रादौ च क्रिय
माणे अयं नियमः ऐष्टिकेषु पाशुकेषु च कर्मसु दर्शपूर्णमासवदेवेति कर्कः सर्वस्मिन्कर्म
णि वर्तमाने वाग्यत इत्यपरे तथा च लौगाक्षिः शुचिर्वाग्यतः शीलीस्यान्नाय ज्ञियां वाचं ब्रू १
या यदि ब्रूयाद्वैष्णवीमृचं यजुर्वा जपेदपि वा नमो विष्णव इत्येव ब्रूयादिति तथा च शांखायनः
दक्षिणतो न्यायं ब्रह्मकर्म साक्ष्यं च सर्वकर्मणां मंत्रवत्सु वाग्यमनमिति कुतः तस्माद्यावद्दा

रंतराले ६

© Dharmartha Trust J&K. Digitized by eGangotri

यजुषा साम्ना कुर्युस्तूष्णीं नाव इह्मासीतेति शांखायनश्रुतेः अथ सोमिके ऐष्टिके च कर्मणि
क्रियमाणे सर्वदा वाग्यमो निर्व्यापारे काले ऽनियम इति सिद्धं अनुयाजप्रस[illegible]दित्येवं सर्व
तुर धिके[illegible]वाग्यमे निर्व्यापारेपि काले वाग्यम एव हिरण्यवत्यां हुतायां दक्षिणेनानुगच्छत्साक्रयात् ब
हिस्त्वेण न हिरण्यं बधावदधात्येषात इति जूरसीति जुहोतीत्येषाहुती हिरण्यवती तस्यां
हिरण्यवत्यामाहुतौ हुतायां सत्यां सोमक्रयण्यानयने होमे सोमं प्रतिगमनार्थे च स्त वेत्रब्र
ह्मा दक्षिणेनानुगच्छति अथ धीधपेक्षया दक्षिणदिगाश्रितः एष तो गच्छतीत्यर्थः आक्रयात्
सोमक्रयसमाप्तिपर्यंतायं ब्रह्मणो दक्षिणतोनुगमनं विधीयते क्रीते प्राङ् तीत्य पूर्वेणानः
परीत्यापरेण वा दक्षिणेनानुगच्छत्सानिधानात् क्रीते सोमे सोमक्रये कृते यदा यजमानादयः
सोममादायानः प्रतिगच्छंति तदा ब्रह्मापि तत उत्थाय प्राङ् तीत्य पदार्थतया किंचित्पूर्वसां
दिशि गत्वा तदनंतरं सोमक्रयदेशस्य दक्षिणतो व्यवस्थितमनः शकटं पूर्वेण परीत्य परिग
म्य शकटमपरेण वा[illegible] तस्मादेव शकटाद्दक्षिणतः सन् तमेव शकटं अनुगच्छति आनि
धानात् शालाया माहवनीयं दक्षिणेन सोमनिधानं यावदित्यर्थः अत्र लाघायनः अमुष्मा
तुदीक्षणीयायां तस्यां संस्थितायामासीतादीक्षणाद्यजमानस्य तं यदाध्वर्युर्वाचं यमयेदथ
यथार्थस्यान्महावीरांस्तं भरिष्यत्सु तूष्णीमुपविशेत्संभृतेषु यथार्थस्यात्प्रायणीयायां संस्थि

परी॰ त्य ४

© Dharmartha Trust J&K. Digitized by eGangotri

तायांपश्चेतंनिष्क्रम्य [illegible] पत्नीशालांजिषेद्दामिहोमास्य दक्षिणराजक्रयण्याऋमिहतउत्त
२ रेणसोमहवनंगत्वाप्राग्वापद्दामिहोमाद्दक्षिणेनयत्रराजानंक्रेष्यंतःस्युस्तत्रगत्वातूष्णीमु
पविशेत्क्रीतेप्राउदक्रामेत्पश्चिमेनैनंहृत्वाराजानमारध्युरहितंपूर्वेणपरीत्याह्यमानमनु
गच्छेद्दक्षिणेनचेदन्ततःस्यादुत्तरेणचेक्रीतेप्रत्स्यदुःक्रामेत्पूर्वेणैनंहृत्वाराजानमारध्युर
हितेपश्चिमेनपरीत्याह्यमानमनुगच्छेत्तामेवात्रेषामन्वावर्तेतसाद्यस्यमाचिवर्तमानस्यद
क्षिणेषाभवतीति विमुक्तेचांतरेणसोमहवनंपत्नीशालांचदक्षिणो निष्क्रम्यतिष्ठेद्दीक्षित
श्चेद्दाराज्ञोवहरणमवेक्ष्यमानंराजानमनुप्रविशेद्यवयंनाग्निनासंबाधंचेत्स्याद्दक्षिणा
यापिद्वाराप्रविशेदुत्तरेणाहवनीयंपश्चिमेनवेदिःसंचरेतदीक्षितश्चेतत्रा निष्क्रामेदि
निर्वपंतेतांचेद्वहतेराजनिनिर्वपेरन्ब्राह्मणराजनिसमादिश्यतत्रासीतेति दक्षिणा
ग्निंवापरेणघर्मेघर्मप्रवर्ग्येक्रियमाणेदक्षिणाग्निमपरेणवागार्हपत्यस्यदक्षिणतआ
सीत वायथोक्तस्थानेआहवनीयस्यदक्षिणतइति तथा[illegible]लायायनःतस्माघर्मःप्रव
र्ग्यवतिपूर्वस्तमभीधिष्ण्यस्तुगार्हपत्यंगत्वायजुषाप्रविशेद्दक्षिणेनदक्षिणाग्निमुत्तरेण
बहिर्श्रेदितिघर्मेपिप्रवर्ग्येआहवनीयंप्रतिनीयमानेआहवनीयसमीपेगत्वाप्रविश २
ति तथाचसएवाह तंह्रियमाणंयमेतमनुव्रजनजपेदाश्राविततेउपविशेयेति स्तंब

© Dharmartha Trust J&K. Digitized by eGangotri

यजुर्हरिष्यसाह[व]नीयदेशं दक्षिणेनासीनो वेदिसहितः औपवसथ्यात्पूर्वेहनियो वी
हिकाप्रचर्यवेदिं मिमीत इति सौमिक्या वेदेः करणमुक्तं तत्र च एषामायम्य स्या
दिकरणानीति स्याद्दानस्तंबयजुर्ह रणादिकमुक्तमतत्र ब्रह्मणो विशेष उच्यते स्तंब
यजुर्हरिष्यतिस्तंबयजुर्हरणं करिष्यन्स ध्रुयौ तदर्थपात्रासादनात्प्रागेव ब्रह्मा आ
तरवेदिकाहवनीयदेशाद्दक्षिणेन वेदिसहितो वेदिसंलग्नो वेदिस्पर्शो बहिर्वेदिश्चासीन
उपविशति आसनमंत्रेण संस्कृतस्तदुक्तं लाघायनेन [..] वेदेस्तंबयजुर्हरिष्यन्स्तु यजु महाई
षोपविशेद्दिलिखिते चात्वाले थायर्थं स्यात् उत्तरवेदिं निर्वपन्स्तु तूष्णीमुपविशेन्मुग्धायां
यथार्थं स्यादिति एवं सर्वत्र प्रागग्नीषोमप्रणयनात् अतः प्रभृति त्वग्नीषोमप्रणय
ग्नीई नात्माक् सोमप्रा[..]भीययोः प्रणयनादूर्ध्वं तत्र सर्वेषु कर्मस्वग्निप्रणयनहविर्धानप्रवर्त
मानोपरवखननसदः करणादिषु वेदिस्तरणांतेषु क्रियमाणेषु वं कुर्यात् एवमिति आहि
वनीयदेशं दक्षिणेन वेदिं सहितं आसीत इत्यर्थः तत्रैवोपविष्टः सन्कृताकृतमप्रत्यवेक्ष
णां कुर्यात् पक्षांतरमाह कर्मणः कर्मणो वा सहितस्तत्तद्देशान्वेषा वा विकल्पेन्यथ वा
हविर्धानप्रवर्त्तनोपरवखननसदः करणाग्नीध्रकरणधिष्ण्यनिवपनादेः कर्मणः कर्म
णः क्रियमाणस्य सहितः संनिहितो दक्षिणत आसीत समीप एव दक्षिणत उपविशतिन

© Dharmartha Trust J&K. Digitized by eGangotri

त्वाहवनीयदेशस्य दक्षिणत एव किं कृत्वा ततदेवान्वेक्ष्य तत्तद् ध्वर्य्वादिभिः क्रियमाणं
२ कर्मान्वेक्ष्य अनुगम्य तत्र तत्र गत्वेत्यर्थः यथा हविर्द्धानप्रवर्तने पूर्वं मंत्तः शालसमीपे
वेदिमध्ये स्थापितयोर्हविर्द्धानयोर्दक्षिणत उपविष्ट आसीत् यदा च हविर्द्धाने प्रणीयेते
3 तदा ब्रह्मा ततउत्थाय यानुगच्छति गत्वा पुनस्तत्र संनिधौ दक्षिणत आसीतेत्यर्थः एवं
सर्वत्र ज्ञेयं तथाचलाद्यायनः अग्निचित्यायां प्राग्दीक्षणीयायाः [illegible] सावित्रहोमा
न्होष्यत्सु यजुषोपविशेत् युहते पूर्ब्वां मन्त्रिकामाह्रियमाणमनुगच्छेत्तस्यां संभ्रि
यमाणायामासित्वा संभृतायां यथार्थं स्यात् आहवनीयं चेष्यत्सु यजुषोपविशेत्
द्वार्यः ६ आहवनीयोत्तरशालौ [illegible] तस्मिन्संचिते उखामासंदीनै क्रीती अष्टका अरण्यंहि
यमाणमनुगच्छेन्निधीयमानानां दक्षिणतः स्थित्वा निहितास्वप उपसृष्यानपेक्षं
प्रत्याव्रजेत् अग्निचिकृष्यत्सु सर्वौषधं च वप्स्यत्सु तूष्णीमुपविशेत्तैः सार्द्धं प्रत्याव्रज्य
चितीः प्रणी[illegible]मानानुगच्छेन्निधीयमानानां दक्षिणतः स्थित्वा निहितासु दक्षिणप
क्षस्यासन्नो यजुषोपविशेत् श्लोकं पृणासूपधीयमानासु ब्राह्मणतत्र समादिश्य यथार्थं
स्यादिति शांडिल्य आसीनैवेति धानंजय्य एवं सदा चितिषु कुर्यात् संचितकर्मणि करिष्य २
त्स्वाव्राजमासीत संम्राडासंदीं ह्रियमाणमनुगच्छेत् स्वरिषिञ्चमाने उपसृश्य तैः सार्द्धं

१५

© Dharmartha Trust J&K. Digitized by eGangotri

मस्यावज्याग्निं प्रणीयमानमनुगच्छेदप्रतिरथं जपंस्तूष्णीमनग्निचित्या चेन्निधीयमान
स्य दक्षिणतः स्थित्वा निहिते दक्षिणेन बर्हिर्वेदिं यजुषोपविशेद्धविर्धाने प्रवर्त्यमानेऽ
नुगच्छेत्सारिवीर्यमाणयोस्तत्रैव गत्वासीत उच्छ्रितायामौदुम्बर्यां यथार्थं स्यादिति अत्र
शांखायनः समानं होत्रा तृणनिरसनं तथोपवेशनं कर्मादौ देशपरत्वे चेति अस्या
र्थः इतिपशुबंधसोमेषु यायः कर्मादिः यज्ञपशु [illegible] एवं तत्र एकस्यैव कर्मणो देश देशप
भेदेनानुष्ठानं तत्र तत्रासनसंस्कार उपवेशनं जपश्चेति भवति अतो देशभेदे सर्वत्रास
नसंस्कारो भवेव तत्रावृत्ताव षड्ढ्वाण खितिवचनाद्घृताहुतिसावित्रापाहुतिहोमार्थोप
वेशने तूष्णीमन्यत्र समंत्रके कर्मणि सर्वत्र समंत्रकेर् ति आहवनीये प्रणीयमाने
प्रतिरथस्य द्वादशर्चं ब्रुवंल्लगैना उक्तं चाग्निं प्रणाध्यस्मोपनिवपनात्कृत्स्ने साहवनीयस्य प्र
णयनं अग्नेनाचयने तस्मिन्नाहवनीये प्रणीयमाने इध्ममादीप्याग्निचित्यायां प्रतिनी
यमाने ब्रह्मा अप्रतिरथं [illegible] द्वादशर्चं ब्रुवन् जपन् दक्षिणतो वस्थितः अनुगच्छति सा
ग्निके कृतावेवं श्रुतत्वात् तस्माद् ब्रह्मा प्रतिरथं जपस्याशुः शिशानो वृषभो न भीम इ
त्येवं द्वाभिरूपा द्वादशर्चं भवंतीति तथा ब्रह्मा दक्षिणतो प्रतिरथं जपतीति अस्य द्वादशर्च
स्य प्रतिरथेन ऋषिणा दृष्टत्वाद प्रतिरथ इति संज्ञा तथा चोक्तं आशुरैन्द्री द्वादशर्च

© Dharmartha Trust J&K. Digitized by eGangotri

हुभो प्रतिरथइतिमानबेचीयमानेग्नौ दक्षिणतः पक्षस्यबहिर्वेघुपास्तइति सर्व
४ त्रैके एके श्रागिवनः सर्वत्रसाग्निके अनग्निके चक्रतावग्निप्रणयनेऽप्रतिरथस्य
द्वादशऋचोब्रुवन्ब्रह्माऽनुगच्छतीत्येवमाहुः ततश्चानग्निकेपि विकल्पेनाप्रतिरथ
जपः स्तीर्णायांयथार्थमेतस्य वेदिस्तरणादूर्ध्वं यथार्थं यथाप्रयोजनमावश्यक
भोजनमूत्रपुरीषाद्यर्थमस्य पुनर्वेदेर्दक्षिणतः स्वस्थाने आस्ते वेदिस्तरणपर्यंतंत
त्रैवास्तइत्यर्थात्सिद्धं अत एव स्तीर्णायां यथार्थमित्युपदेशाद्वेदिस्तरणानंतरमेव
सर्वे भोजनाद्यावश्यकंकर्म कुर्वन्नातिगच्छते अग्नीषोमप्रणयनायोत्तरेणाधिष्ण्यांच्छा
लाद्वार्यं पूर्वेणासीत दक्षिणतः अग्नीषोमप्रणयनार्थं यदा ब्रह्मा शालायामागच्छ
ति तदाहवनीयदक्षिणादेशादुत्थाय पूर्वेण वेदिमागत्य चात्वालमुत्करं च दक्षिणे वै६
नागत्याग्नीध्रीयान्सर्वान्धिष्ण्यानुत्तरेण गत्वा पूर्वद्वारेण शालांप्रविश्य शालाद्वार्यं
पूर्वेणोत्सृगत्वा तस्यैव शालाद्वार्यस्य दक्षिणतः आस्ते उपविशति हुते च सोमममादा
याग्निमन्वेति प्रदीप्तमिध्यं त्वं सोमेति प्रचरण्याभिजुहोति जुषाणोऽप्तुरितिद्वि ४
तीयामित्ययं वै सर्जनहोमः प्रदीप्तेध्यस्योपरि विहितः तस्मिन्वैसर्जने हुते ब्रह्माय
जमानो यस्यात्सोमममादायाग्निमाग्नीध्रीयमध्वर्युणा प्रणीयमानमन्वेत्यनुष्टुप् छन्ता लग्ना

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रा ११

गच्छति यजमानो वा सोमं हरेत् अथवा यजमान एव सोमं हरे[stain] ब्रह्मा अन्यस्मै
प्रदायानिहिते यथेतमेत्यास्ते दक्षिणतः अनिहिते ऽध्वर्युणा आग्नीध्रीये धिष्ण्यस्यो
पर्यस्थापिते ब्रह्मा च सोमं हरन् भवति तदा तं सोममन्यस्मै प्रदाय तावदन्यस्य हस्ते धा
रणार्थं समर्प्य यथेतमेत्य येन मार्गेण गतस्तु उत्तरेण धिष्ण्यमिति तेनैवागत्याग्नीध्री
यस्य दक्षिणत आस्ते होमं यावत् तत्र च होम उक्तो यं न इति [stain] होऽस्मिन्निति हुते च — शु ५
सोममादाय आहवनीयं चातीत्य हुते च येसर्जनीये ब्रह्मा पुनरन्यहस्तात् सोममादाया
हवनीये समर्प्य गत्वा च कारणस्य पुनरन्यस्मै सोमं प्रदाय आहवनीयं पूर्वेणातीत्यातिक्रम्य
तस्मै व दक्षिणतो बहिर्वेदि वेदिसहित आस्ते अत्र लाट्यायनः क्रीत्वा राजायनातित्व
तः स्यात् नेगत्वा तूष्णीमुपविशेद्राजानं हरेत्सुकः पूर्वेणाग्निमेकस्मा अतिप्रदाय तानम
संप्रयात्सादायानुगच्छेत् दक्षिणेन चेद्रतः स्यादुत्तरेणैव यथेतमग्निं परीत्यादायानुग
च्छेदन्येन चेद्ब्रह्मा ब्रजितः स्यात् द्व्येन राजा तेनैनं प्रतिगृह्णीयादेनौ त्वेव ब्रह्मणो गति क
ल्पो वहरतोपि आसीताग्नीध्रीमग्ना हुत्योर्हूयमानयोरिति धानंजय्यः शिशे दिति शाण्डि
ल्य उत्तरेणाग्नीध्रीयं राजानमाज्यानि चाह्रियमाणान्यनुगच्छेत् सर्वेष्वित्यतेषु हविर्द्धानं य
श्चिमेन गत्वा सीतेत्ति गौतमः पूर्वेणेति शाण्डिल्यो दक्षिणस्य द्वारबाहोः पुरस्ताद्यजुष्मेति अ

© Dharmartha Trust J&K. Digitized by eGangotri

ग्नीषोमीयवपायांहुतायांयथेतमुदङ्ङुःतिक्रम्यचात्वालेमार्जयेतैवमेवापररात्रेआ
५ ज्येषुप्रविष्टेषूपवेशनंमार्जनंच सवनीयवपायांहुतायां पुरोडाशेनचरिष्यत्सुतूष्णीमु
पविश्नोदीक्षितश्चेत्सर्वाॠडा अन्वारभेतवसतीवरीषुपरिह्रियमाणासुदक्षिणतउत्क्रम्य
तिष्ठेद्दीक्षितश्चेदाग्नासांपरियायाद्गाग्नीध्रीयंराजानंह्रियमाणमनुगच्छेन्निधीयमान
स्यदक्षिणतःस्थित्वात्वानिहितेयथार्थंस्यात् दीक्षितश्चेत्तत्रैवसंविशेदिति अत्राहलौ
गाक्षिः अग्नीषोमयोःसंनयोःसंचरेणप्रविश्यापरेणहविर्धानंदक्षिणपरिक्रम्यदक्षि
णतोग्नेरनंतरउपविशत्यस्यत्रासीतामार्जनाद्धुतायां वपायांयथेतंप्रत्येत्यचात्वालेमार्ज
यित्वापरेणोत्तरवेदिंदक्षिणापरिक्रम्ययथास्थानमुपविशत्येषोत्तऊर्ध्वंसंचरइति अ
त्राहवनीयस्यदक्षिणतःसमीपएववेदिमध्येब्रह्मणोपवेशनमुक्तं दक्षिणतोग्नेरनंत
रउपविशतीतिपश्चिमेनोत्तरवेदिंब्रह्मणःसंचरोप्युक्तःमानवेच यदिराजानंहरेतू
र्हविर्धानांतेधुर्यंवेप्रदायोत्तरेणाग्नीध्रीयमपरेणसदोदक्षिणेनसदोमार्जालीयेहवि
र्धानंगत्वाज्यानांदक्षिणतउदङ्मुखउपविशत्येषसंचरइति अपररात्रेग्नीषोमप्र
णयनवदितिचेत् अपररात्रेसवनीयपशोःपरिहरणपात्रासादनादौक्रियमाणेब्र ५
ह्माइतिचेन्नग्नीषोमप्रणयनवत्कुर्यात् अग्नीषोमप्रणयनवदिति अग्नीषोमप्रणयने

© Dharmartha Trust J&K. Digitized by eGangotri

येन मार्गेण गत्वा शालाद्वार्यं दक्षिणेनोपविष्टस्तेनेत्यर्थः तेनोत्तरेणाधिष्ण्यां कालाद्वार्यं यपू
र्वेणैत्यासौ दक्षिणतः इत्येतदत्र भवति इदं तु न्याहवनीयं दक्षिणेनैवेति विकल्पः अत्र ला
घायनः अपरेणाग्नीध्रा आज्यानि ग्रहीष्यतः पूर्वेण गत्वाग्निं च यथाश्रमेण वा यजुषोपविशे
दन्तेषु प्रातः अनुवाक्यमप्रसंयं परीत्यानुगच्छेत् पूर्वेण चेद्गतः स्यात्सश्रमेण च यथेतमग्निं
परीत्यानुगच्छेत्सर्वेष्विनिषूपविशेदाज्येष्वेवं गृह्यमाणेषु तत्रोपविशेदिति शाण्डिल्यो
धिष्ण्येषु णीतो वा चं यच्छेदातृतीयं प्रातरनुवाकस्य प्रथमायाः आवा परिधानीयाया आवो
पांश्वन्तर्यामयोर्होमाद्वा बहिष्पवमानाद्धविर्धानं चेत्पूर्वेणगतः स्यादुपांश्वन्तर्यामौ हो
के८ ष्यत्सूदगुः [illegible] ष्यति दीक्षितश्चेदात्तयोर्होमान्निः सर्पेत्स्वन्वारभेत तस्य प्रस्तोत्रा सम
नं कर्म प्रागुपवेशनात्सावं प्राप्यासं नो यजुषोपविशेत्सप्रस्तोतारं प्रतीति लौगाक्षिसूत्रे
विशेषः सवनीयासु प्रपद्यमानासु अनुप्रपद्येतापरेण दक्षिणं हविर्द्धानं दक्षिणपरिक्रम्य
दक्षिणतः सोमस्यानन्तरमुदङ्मुख उपविशत्यासीत सर्पणात्सर्पणकाले मैत्रावरुण
मन्वारभ्य निःसर्पेदिति सवनीया एकधनस्या आपः अतोभिषवकाले ब्रह्मा हविर्द्धान
मध्ये दक्षिणतोभिषवस्थानस्योपविशति विप्रुषां होमं हुत्वा प्रतिहर्त्तारमन्वारभेत वा
दीक्षितः अदीक्षितो ब्रह्मा विप्रुषां होमं हुत्वा यस्ते द्रप्स इत्येत[illegible]त्रकामाज्याहुतिं हुत्वा

नं१

© Dharmartha Trust J&K. Digitized by eGangotri

प्रतिहर्तारं पवमानार्थं सर्पंतमन्वारभेत न विकल्पेन । वा विकल्पार्थः अदीक्षित इत्युक्तत्वा
त्सत्रेषु दीक्षितो ब्रह्मा विप्रुड्ढोमपूर्वकं नियमेन प्रतिहर्तारमन्वारभते यजमानस्तु ब्रह्मा
णमन्वारभते प्रतिहर्तारं ब्रह्मा तं यजमान इति छंदोगसूत्रात् प्रस्तोत्रामंत्रित एतं ते
देव सवित स्तुत सवितुः प्रसव इत्युक्त्वा प्रसौति पवमानादिसर्वस्तोत्रेषूपाकरणानं
तरं प्रस्तोता ब्रह्मन्स्तोष्यामः प्रशास्तरित्यनेन मंत्रेण ब्रह्माणमामंत्रयते इच्छति स
च ब्रह्मा प्रस्तोत्रा एवमामंत्रितः इष्टः सन् एतं ते देव सवितरित्यमुं मंत्रं तेन मामवेत्यंत
मुक्त्वा परित्वा ततः स्तुत सवितुः प्रस[व] इत्यनेन मंत्रेण प्रसौति प्रस्तोत्रादीननुजानाति
स्तवनाय स यत्राह ब्रह्मन्स्तोष्यामः प्रशास्तरिति तद् ब्रह्मा जपस्येतं त इत्यादि श्रवणात् अ
त्रोत्का प्रसौतीति द्वयोः क्रियमाणयोर्यथाक्रमं संबंधः एतं त इत्युक्त्वा देव सवितरिति प्र
सौतीति एतेनन्वेव भूयिष्ठा इवोपचरंतीति श्रुतिः पक्षांतरमाह देव सवितरेतद्धस्ते
प्रेतेवा अथवा देव सवितरेतद्धस्तेप्रेत्येतावंतं मंत्रमुक्त्वा स्तुत सवितुरित्यनेन प्रसौ
ति अनेनन्त्वेवोपचरेद् देव सवितरेत[द्ध]स्ते प्रेतीति श्रुतत्वात् पुनरपि पक्षांतरमाह रश्मि
ना सत्यायेति वा प्रति मंत्रं रश्मिना सत्याय सत्यं जिन्वेत्यत्रैकोनत्रिंशत्स्तोमभागमंत्राः सं
ति तत्राग्निष्टोमे द्वादश स्तोत्राणि तत्र रश्मिना सत्यायेत्यादिभिर्द्वादशमंत्रैः प्रतिमंत्रं प्रतिस्तोत्रं

© Dharmartha Trust J&K. Digitized by eGangotri

क्रमेणैकैकेन मंत्रेण प्रसौति रश्मिना स[illegible]स्यायेत्येवमादिकमेकैकं त्रेमंमुक्त्वा स्तुत
सवितुः प्रसवइत्यनेन मंत्रेण प्रसौति स्तुत सवितुरित्ययं सर्वत्र भवत्येवेति कर्काचार्याः
अत्र कठसूत्रे विशेषः बृहन्स्तोष्यामइत्युक्ते रश्मिरसीत्यनुवाकस्तोमभागाः प्रतिमंत्रं देव
सवितरित्यनुषंगस्तेषामेकैकं स्तोत्रे षु द्वादशाग्निष्टोमे पंचदशोक्थ्ये षोडश षोडशिन्युत्तरे
द्वादशरात्रियर्यायेषु उत्तरे त्रयोरथंतरे संधौ नाहोर्यामत्र्न्न द्वेमाश्विनान्न वाजपेयस्या
तिरिक्तस्तोत्रे यथाम्नायस्तेणोक्तमेवान्नानुज्ञानमिति छंदोगसूत्रे रश्मिरसीत्येतावनुवा
कौ स्तोमभागास्तैः पृथगनुपूर्वं स्तोत्राण्यनुमंत्रयेत ब्रह्मन्स्तोष्यामः प्रशास्तरित्युक्ते त
या सवितः प्रसूता बृहस्पतये स्तुतेत्येकैकस्मात् इति तथा यद्यस्तोत्रं लुप्यते सर्वैः स्तोम
भागैर्न अस्यार्थः समुदितानामनुमंत्रणसाधनत्वमुक्तं सांप्रतं यद्यस्तोत्रं लुप्येत तत्रा त ३
स्यपदनुमंत्रणं तदपि लुप्येत कोस्य विषयः षोडशी यदा[illegible] षोडशिकावतिरात्राविस्या अस्य ५
द्रौ षोडशी लुप्यते तदा षोडशो मंत्रोपि तदीयो लुप्यते न र्हि यद्यदितिवीप्सा किमर्था उ
च्यते यदाग्निष्टोमे षोडशी क्रियते तदा ततः पूर्वाणि त्रीणि उक्थ्यस्तोत्राणि लुप्यं
ते तत्र तदीयानां त्रयोदशप्रभृतीनां त्रयाणां मंत्राणामपि लोपो भवति षोडशेनैव मं
त्रेण षोडशिनोनुमंत्रणं कर्तव्यमिति तथा स्तुते बहिष्पवमाने तत्रैव गत्वासीत व

© Dharmartha Trust J&K. Digitized by eGangotri

पायां हुतायां मार्जयित्वा धिष्ण्याननुपस्थायो कं सदस्युपवेशनमिति सुतशस्त्रयोर्वा चे
यच्छेदनूच्यमाने सर्वत्र वषट्कृते विसृजेतेति येन प्रवेशनं तस्मिन् सर्पणं सदसो येन
द्वारेण प्रवेशनं ब्रह्मा कुर्यात्तस्मिन् द्वारे सर्पणं कुर्यात् कृतस्य द्वारा विति द्वार्ये इत्येत
द्वार्ययोरभिमर्शनं तस्मिन्नेव द्वारे कर्तव्यमित्यर्थः तस्यैव संस्कार्यत्वात् अतो येनेत्य
निर्द्धारितविशेषोपदेशाद् ब्राह्मणः सदसः प्रवेशो द्वारविकल्पः पूर्वेण वापरेण वेति तत्रा
परेण प्रवेशे संचरविशेषमाह पूर्वेण यूपं परीत्यापरेण चेत् चेद्यदि अपरेण सदसो
द्वारेण ब्रह्मा प्रवेष्टुमिच्छति तदा स्वस्थानात् पूर्वेण यूपं परीत्याग्नीध्रीयं सदश्चोत्तरेण
गत्वापरे[illegible] सदसो द्वारेण प्रविशति पूर्वेण चेद् परेणैव यूपमिति तदा च ब्रह्मा सन्नाद्
विर्द्धानं दक्षिणेनैवागत्वा पूर्वेण सदसो द्वारेण सदः प्रविशति अथ सदस्युपवेशनस्था
नमाह प्रशास्तुर्दक्षिणत आस्ते ब्रह्मा स्तोत्रशस्त्रकाले सदसि प्रशास्तुर्मैत्रावरुणस्य द
क्षिणत आस्ते उपविशति गृह पुरोडाशादि होमकाले पुनरुत्स्था[illegible] प्रशास्तृधिष्ण्यं द
क्षिणेनोत्तरेण वागत्वा पूर्वद्वारेण निष्क्रम्य हविर्द्धानं दक्षिणेन गत्वा स्वस्थाने उपविश
ति अपरेण धिष्ण्यानितरे इतरे ब्रह्मपुरुषाः धिष्ण्यानपरेण स्वस्य स्वस्य धिष्ण्यस्य
पश्चादासने उपविशंति तेषां च तेषां च स्वं धिष्ण्यमपरेणासते उपविशति अध्वर्युपु

© Dharmartha Trust J&K. Digitized by eGangotri

वर्णोत्तरमेतेन संचरेणप्रवेशनं॥ कर्मातीत्येव तेनैव निर्गमोन्तु सर्वदा॥
इति कात्यायनग्रंथ सिद्धांतो विद्यते खलु॥ अयं च संचरः प्रोक्तः श्रीकात्यायनसूत्रेतः॥ =१०=

श्री कात्यायनसूत्रस्य भाष्यस्याः कारिकाइमाः॥ =६=

प्रा.२॥

रुषत्वात्तस्य पृथगुक्तं अथ ब्रह्मणः असमाप्ते सवने गन्तृ पुरोडाशादि होमेषु क्रतोरुत्तमस्य वेक्षणार्थं गमनागमनाय संचरमाह विसंस्थितसंचरः अ[ ]स्याधिष्ण्यं वोत्तरेणापवमाने विसंस्थितमसंस्थितमुच्यते तस्मिन् संचरो विसंस्थितसंचरः असमाप्ते सवने ब्रह्मणो यः संचरः संचरणं गमनमागमनं अपवमानमिति पवमानार्थागमननिमित्तव्यतिरिक्तः स प्रशास्तृधिष्ण्यमुत्तरेण वा भवति वा दक्षिणेनेति पवमानार्थं संस्थिते च सवने प्रशास्तृधिष्ण्यं दक्षिणेनै[ ]वेति स्वं स्वमितरे स्वं स्वमितरे इतरे ब्रह्मपुरुषाः स्वं स्वं धिष्ण्यमुत्तरेण वा अपरिसमाप्ते सवने गच्छंति वा दक्षिणेन संस्थिते तु दक्षिणेनैवेति द्विरभ्यासोध्यायपरिसमाप्तिसूचनार्थः अभियुक्ततरैरन्यैरुक्तायें ब्रह्मसंचराः न्यायतो वचनाद्वापि श्लोककैस्तान्निबध्यते १ ब्रजेदाहवनीमं तु पूर्वेणाथ परेण वा इष्टिपश्वोरयं प्रोक्तः संचरो वरणात्तदा २ दर्शे च पौर्णमासे च वरणात्प्राङ् विद्यते न चैवोत्सर्जनादूर्ध्वं ब्रह्मकर्म प्रशेनतथा ३ न साक्ष्यं पुरुषार्थेषु यज्ञमित्यधिकारतः अतो न संध्या वाग्यमे शयनेन प्रबोधने ४ न विलुक्रमवात्स्वपेन कंडूयनमेहने समिद्धत्वीवाहृत्तौ नैव लब्ध्यस्य वाचने ५ भस्मोद्धापे तथा भस्मप्रतिपत्तिक्रियासु च अग्निहोत्रेष्क्षा। नो ब्रह्मा कुंडपाय्येपि तत्तथा ६ कर्मणः क्रियमाणस्य मायश्चासनसंच[ ] दक्षिणान्या

= श्रौ =

संध्योकालीने =

बोधनइत्येव पाठः ६

रै१

© Dharmartha Trust J&K. Digitized by eGangotri

यतः सूत्रे अग्नीनांचाप्यवायतः ७ हुते हिरण्यवद्धोमे अनुगच्छति दक्षिणः परीत्सानः
८ क्रयेवृत आनिधानात्तथा व्रजेत् ८ प्रवर्ग्याभिष्टवेपश्चाद्दक्षिणाग्नेरुदङ्मुखः आ
सित्वा चानुसंयानेयायात्प्राग्दक्षिणेन तं ९ आसीतोदङ्मुखो नित्यं वेघंसाद्दक्षिणात्
बहिः वेदिमानप्रभ्रस्यां तान्स्तानि साक्ष्यस्य संभवे १० अग्निप्रणयनं सोग्नावुन्नेत्रचय
धोदितं प्रवर्ग्योत्सादनेन्वेति दक्षिणेनाविरोधतः ११ आग्नीध्रेयदि कर्मस्याद्दक्षि
णेनाग्निमासनं खरपात्रोत्तरेणास्य आसामावादेषु संचरः १२ प्रविश्य दक्षिणेनैव नत्त्रे
वास्त उदङ्मुखः यत्र संचरमास्थाय यानुयायात्सदः सःपुनः १३ तेनैव शीघ्रमागत्याग्न
ग्घ्यामात्तत्र चासनं आशान्तेनैव निःसर्पेत् घर्मोत्सादनकर्मणि १४ परिसंदमनुव्र
= औपेते = ज्य प्रत्येयाद्वा यथागतं दक्षिणेनैव सदसो हविर्द्धाने च संचरः १५ उत्सादने चेदग्नीध्रा
स्यादप्रवायोत्र कारणम् प्रणयंति यदाग्निं च सोमं चाध्वर्यवस्तदा १६ होतृवत्संच
रेत्तस्य सएवापरणत्रिकः ततआहायराजानमन्वेत्स्वग्निं परेच्छया १७ हुते वैसर्जि
ने होमे रिक्तको वा यथागतं राजानमप्यहत्ते तु कृत्वाग्नीध्रे सहासनम् १८ एवमाहव
नीयेपि यावद्वैसर्जनाहुतिः अग्नेणैव वितानस्य प्रत्येत्स्वं प्रविशेत्ततः १९ द्वाराऽसोमः ८
ससोमो वा हविर्धानं तु पूर्वया इच्छंति पश्चिमेनान्यद्द्वारेणैव प्रवेशितुम् २० ब्रह्मणोपि

© Dharmartha Trust J&K. Digitized by eGangotri

तथैवात्र सोमहस्तस्य संचरः मार्जालीयं तु पूर्वेण आगच्छेदृत्विक्को यदि २१ अनसो द
क्षिणस्यैव आलेर्दक्षिणतस्ततः उत्थाय पश्चिमे यामे साक्ष्यमध्वर्युकर्मणः २२ कृत्वा
होतुस्ततः कुर्यात्स ठतः स्वासनस्थितः ततः प्रदक्षिणं यज्ञं परीत्याभिषवेक्षणे २३
प्रविशेत्पूर्वयाद्वारा सर्पतामनुतद्दृशः सदः प्रवेशः सूत्रोक्तः संचरश्च विसंस्थिते २४
बहिः संज्ञस्य सदसि पवमानस्य चेक्रिया पूर्वेणैव प्रशास्तारं ब्रह्मणो गतिरागतिः
२५ मानसे ब्रह्मवधे व चक्रारोहण एव च यज्ञसंचर एवं स्यात्सयैस्सेवाभिषेचने २६
कुर्वतां न्यायवचनं व्यवायं प्रतिषेधता उक्तमेव सुयज्ञेन तद्वेदमुदाहृतं २७ आसन
स्य च संस्कार आसनं च यथोदितं कर्मादौ देशभेदे च तद्वेदं प्रपंच्यते २८ साक्ष्यं चे
ति च शब्देन साक्ष्यस्याप्यासनस्य च साहचर्ये सुयज्ञेन सर्वत्र प्रतिपादितं २९ आव
तैव नमंत्रेण होमे याज्यांत वर्जिते सर्वत्रासनसंस्कारः कात्यायनमतं यथा ३० इष्टि
तंत्रे पशौ संत्रे या स्तासां नैतदिष्यते युक्तमन्यत्र सर्वत्र श्रुत्संतरनिदर्शनात् ३१ नैकु नकारे संशयः।।
र्यात्क्रमार्हपत्यस्य आधाने चेतरस्य तु इध्मे नैव सहासीत दक्षिणाग्नेर्न विद्यते ३२ पूर्वे
धुः पुनराधेये कालभेदात्स कीर्तितः शेषसाधारणं ज्ञेयं विशेषानानयोर्यतः ३३ चा
तुर्यास्ये पशुसोमे वान्यो विशेषः सदइहोच्यते प्राकृते पूज्यमानस्तु वैकृते चातिदेशिकः ३४ प्यतिदेशकः

थे ३ शेषमाधानवत् इत्येव पाठः।। = न्यै - २ =

© Dharmartha Trust J&K. Digitized by eGangotri

औवि =

अविमोकात्प्रणीतानांकृतःसांनयनीयकःनकार्योग्निहमेधीयेपूर्णिर्दर्वेत्तथैवच ३५ पित्र्या
यामादितोवेदेःक्रियायामग्निसंचरे विपर्ययेचकर्तव्यस्त्र्यंबकेष्वपरस्तथा ३६ उ[illegible]सं
भरणेश्वभ्रकरणेधूपयाकयोः आकर्षनेसहोह्यामेमहावीरउखासमाः ३७ नैऋतिस्तं
बयजुषोःसारस्यचनियोजनेसोमक्रयाद्वावासीनपदंदक्षेक्रयस्यच ३८ परिधानेचा
शालायांतूष्णीमेवकृतोयतः चयनेगार्हपत्यस्यचितिप्रणयनेतथा ३९ चयनादौपुरी
षादौकुंभक्षेपनेनेष्यते प्रवर्ग्यादौचसर्वत्रअनुव्रज्यासनंततः ४० अनिमित्तेपिकर्तव्यो
यत्ररात्रिर्व्यवायिका आदौतंत्रमनुव्रज्यघर्मोत्सादेसमुक्षणे ४१ अग्निप्रणयनेचैवमु
क्त्वाप्रनिरथौयथा वैश्वानरस्यशालायांमारुतानांचतंत्रतः ४२ पुनरन्वेत्सहोमादौदश
मेहादिहासनं स्वासनस्याहविर्द्धानेनभ्यस्यैवेदनाहते ४३ आदौनोपवारेणांतुप्रविष्टे
प्रहिनभ्ययोः आगारमानेस्पैकत्वातूष्णीमेवसकृत्क्रिया ४४ औदंबर्यास्तुसंमानेससंस्कारः
स्यात्समंत्रकः आग्नीध्रीयेधिष्ण्यमानेसदस्यपिसकृत्क्रिया ४५ स्वस्थानएवसंस्कारोमार्जा
लीयेयतस्त्वये एषएवविधिर्दृष्टस्तुल्यत्वाद्देशभेदयोः ४६ कृतोयद्यपिवेद्यर्थेप्रवधाना
सुनःक्रिया अग्नेःसोमस्यनयने अग्नीधःशरणेपुनः ४७ स्वासनेचासनंकृत्वापशोरादौ
पुनःक्रिया आहुतश्चेद्दृहिंस्तत्रेयोपितंत्रात्रवायदि ४८ ततःपशुपुरोडाशश्रपणेसंनि

हूं हि नै

= सनस्यैषा =

© Dharmartha Trust J&K. Digitized by eGangotri

धानतः कुर्यात्स्वश्रिमरणेत्रेच शालायामेवचासनं ४९ आज्यग्रहणमाग्नीध्रे स्वदेशे
१० चपुनस्ततः कार्योनिर्वापेसोमस्य हविर्द्धानेतथास्तवे ५० सदः प्रविश्य कर्त्तव्यः सर्वत्रै
10 वप्रसर्पणे होमेसान्स्यंसदाकुर्याद्धुताहुत्यस्याविरोधतः ५१ मानसादौचकर्त्तव्योरथच
क्रेत्तणंविना इत्याद्यौसर्वहोमादौपश्चाद्दौचप्रकीर्तितः ५२ इतिश्रीत्रिरग्निचितसं
म्राट्स्थपतिमहायाज्ञिकश्रीश्रीप्रजापतिसुतयाज्ञिकश्रीदेवेन कृतेकात्यायनसूत्रव्या
ख्यानेएकादशोध्यायः समाप्तः श्रीरस्तु संवत्॥

© Dharmartha Trust J&K. Digitized by eGangotri

एकादश
पत्रे १०

© Dharmartha Trust J&K. Digitized by eGangotri